Series &RQPS/S

Set-4

प्रश्न-पत्र कोड
Q.P. Code **49/S**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (ऐच्छिकम्)
# SANSKRIT (Elective)

*समयः : होरात्रयम्* — *पूर्णाङ्काः : **80***
*निर्धारित समय : **3** घण्टे* — *अधिकतम अंक : **80***
*Time allowed : **3** hours* — *Maximum Marks : **80***

| | नोट | | NOTE |
|---|---|---|---|
| (I) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं । | (I) | Please check that this question paper contains **19** printed pages. |
| (II) | कृपया जाँच कर लें कि इस प्रश्न-पत्र में **19** प्रश्न हैं । | (II) | Please check that this question paper contains **19** questions. |
| (III) | प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (III) | Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (IV) | **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।** | (IV) | **Please write down the serial number of the question in the answer-book before attempting it.** |
| (V) | इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) | 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |

***General Instructions :***

*Questions paper is divided into **5** sections.*

*It has total **19** questions.*

***Section A** – 1 Question no. 1 to 1*

***Section B** – 2 Questions no. 2 to 3*

***Section C** – 5 Questions no. 4 to 8*

***Section D** – 9 Questions no. 9 to 17*

***Section E** – 2 Questions no. 18 to 19*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य निर्देशाः***

*अस्मिन् प्रश्नपत्रे **पञ्च** खण्डाः सन्ति ।*

*अस्मिन् प्रश्नपत्रे नवदश **(19)** प्रश्नाः सन्ति ।*

***खण्डः 'क'*** – *1 – प्रश्नसंख्या 1*

***खण्डः 'ख'*** – *2 – प्रश्नसंख्या 2 – 3*

***खण्डः 'ग'*** – *5 – प्रश्नसंख्या 4 – 8*

***खण्डः 'घ'*** – *9 – प्रश्नसंख्या 9 – 17*

***खण्डः 'ङ'*** – *2 – प्रश्नसंख्या 18 – 19*

*विशिष्टनिर्देशानुसारं प्रश्नाः समाधेयाः ।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया ।*

## खण्डः 'क'

## अपठित-अवबोधनम्

*10 अङ्काः*

## अपठित अवबोधन

## Unseen Reading Comprehension

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following passage and answer the given questions in Sanskrit.

आधुनिकं युगं विज्ञानस्य युगमस्ति । युगेऽस्मिन् सूचनाप्रौद्योगिक्योः अत्यधिकं महत्त्वं वर्तते । सङ्गणकेन उभयोः क्षेत्रयोः क्रान्तिः आनीता । पूर्वं संगणकस्य मुख्यम् उद्देश्यं तु गणनायां तीव्रता आसीत् परम् इदानीं सर्वेषु क्षेत्रेषु सङ्गणकस्य उपयोगिता सिद्धा एव । प्रायः सर्वेषु कार्येषु सङ्गणकस्य प्रयोगः क्रियते । सङ्गणकस्य प्रयोगेन जनानां जीवनं सरलं सुखमयञ्च अभवत् । वातावरणविभागः संगणकेन गणनां कृत्वा अतिवृष्टेः अनावृष्टेः च विषये भविष्यवाणीं करोति । अनेन कृषकाः उद्योगिनो जनाः सावधानाः भवन्ति । सङ्गणकेन प्रौद्योगिक्याः क्षेत्रे निरन्तरं नवीनतायाः समावेशः भवति । अन्तरिक्षयानस्य मार्गदर्शने सङ्गणकस्य महती उपयोगिता वर्तते । कृत्रिमबौद्धिकता (Artificial Intelligence) सङ्गणकस्य प्रगत्याः नवीनतमं सोपानं वर्तते । अतः आधुनिकं युगं सङ्गणकस्य युगम् इति कथनम् उचितमेव अस्ति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *2×1=2*

(i) अस्मिन् युगे कस्योः अत्यधिकं महत्त्वं वर्तते ?

(ii) कः अतिवृष्टेः विषये भविष्यवाणीं करोति ?

(iii) पूर्वं कस्य मुख्यम् उद्देश्यं गणनायां तीव्रता आसीत् ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×2=4*

(i) जनानां जीवनं कथं सरलम् अभवत् ?

(ii) सङ्गणकविषये किं कथनम् उचितमस्ति ?

(iii) सङ्गणकस्य महती उपयोगिता कुत्र वर्तते ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. *1×1=1*

(ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
निर्देशानुसार उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Choose the appropriate answer and write as directed.
(Only three questions) *3×1=3*

(i) 'वातावरणविभाग: सङ्गणकेन गणनां कृत्वा अनावृष्टे: विषये भविष्यवाणीं करोति ।' अत्र 'करोति' इति क्रियापदस्य कर्तृपदं किम् ?
(A) विषये
(B) वातावरणविभाग:
(C) अनावृष्टे:
(D) गणनाम्

(ii) 'अन्तरिक्षयानस्य मार्गदर्शने सङ्गणकस्य महती उपयोगिता वर्तते ।' अत्र विशेषणपदं किम् ?
(A) मार्गदर्शने
(B) उपयोगिता
(C) महती
(D) यानस्य

(iii) 'आधुनिकं युगं सङ्गणकस्य युगम् इति कथनम् उचितम्' अत्र 'पुरातनम्' इति पदस्य विलोमपदं किम् ?
(A) युगम्
(B) आधुनिकम्
(C) कथनम्
(D) उचितम्

(iv) 'अनेन कृषका: उद्योगिनो जना: सावधाना: भवन्ति ।' अत्र 'जागरूका:' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?
(A) जना:
(B) कृषका:
(C) सावधाना:
(D) भवन्ति

## खण्डः 'ख'

## रचनात्मक-कार्यम्

## रचनात्मक कार्य

## Writing Skills

*10 अङ्काः*

**2.** भवान्/भवती देहलीनगरे वसति । गतसप्ताहे भवता/भवत्या जयपुरनगरं दृष्टम् । अस्य नगरस्य ऐतिहासिकं सांस्कृतिकं च वैशिष्ट्यं वर्णयन्/वर्णयन्ती मेरठनगरवासिनं स्वमित्रं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत ।

आप देहली नगर में रहते हैं । गत सप्ताह आपने जयपुर नगर देखा । इस नगर की ऐतिहासिक और सांस्कृतिक विशेषताओं का वर्णन करते हुए मेरठ नगरवासी अपने मित्र को मंजूषा में दिए गए संकेतों की सहायता से एक पत्र लिखिए । *5*

You live in Delhi. You had visited Jaipur last week. Write a letter to your friend who lives in Meerut explaining the historical and cultural significance of Jaipur city with the help of the clues given in the box.

**मञ्जूषा**

| |
|---|
| नमोनमः, मित्रम्, राजस्थानस्य, पाटलनगरी, जयपुरम्, अरावलीपर्वतमालाभिः, अस्य, सवाईजयसिंहः, अकरोत्, नगर्याः सौन्दर्यम्, अतिथिः देवो भव, उत्सवप्रियाः, राजप्रासादः, नृत्यगायनयोः रुचिः, पारम्परिकः नृत्य-घूमरः, लोकसंस्कृतिः, नियोजितनगरेषु एकः, अस्ति, जयपुरस्य साहित्योत्सवः, अहम्, अभवम् । |

**अथवा (OR)**

विद्यालयस्य छात्राः देहलीस्थं विज्ञान-सङ्ग्रहालयं द्रष्टुमिच्छन्ति । अस्मिन् विषये स्वविद्यालयस्य प्रधानाचार्यं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत ।

विद्यालय के छात्र देहली के विज्ञान संग्रहालय को देखना चाहते हैं । इस विषय में अपने विद्यालय के प्रधानाचार्य को मंजूषा में दिए गए संकेतों की सहायता से एक पत्र लिखिए ।

The students of the school want to see Science Museum of Delhi. Write a letter to the Principal of your school in this regard with the help of the clues given in the box.

**मञ्जूषा**

| |
|---|
| सेवायाम्, श्रीमन्तः, अयं युगः, वैज्ञानिकोन्नतिम्, इच्छुकाः, सन्ति, छात्राः, विज्ञानविषये, अस्माकम्, विज्ञानस्य आविष्काराः, अहमपि, सर्वेषां ज्ञानाय, रोचकः, तथ्यानि, सन्ति, प्रार्थनामिमाम्, स्वीकृत्य, भवन्तः, निवेदनम्, भवताम्, आज्ञाकारी । |

**3.** (क) प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत ।
दिए गए तथ्यों की सहायता से निम्नलिखित विषय पर संस्कृत में अनुच्छेद लिखिए ।
Write a passage on the topic given below with the help of the given facts in Sanskrit. *5*

विषय: – सदाचार:

सदाचारस्य अभिप्राय:, सदाचारस्य महत्त्वम्, चारित्रिकोत्कर्षे सदाचारस्य आवश्यकता, गुणानां विकास:, सदाचरणेन आत्मिक विकास:, आचार: परमो धर्म:, उपसंहार: ।

**अथवा (OR)**

(ख) अधोलिखितवाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत ।
निम्नलिखित में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए ।
Translate any **five** of the following sentences into Sanskrit. *5×1=5*

(i) मुझे लड्डू अच्छे लगते हैं ।
I am fond of Laddus.

(ii) वह साँप से डरता है ।
He is afraid of snake.

(iii) मोहन पुस्तकालय से एक पुस्तक लाया ।
Mohan has taken a book from the library.

(iv) दिल्ली नगर का ऐतिहासिक महत्त्व है ।
Delhi is a city of historical importance.

(v) अध्यापक ने मोहन की सत्यवादिता की प्रशंसा की ।
The teacher praised the truthfulness of Mohan.

(vi) राम ने कलम से सुन्दर चित्र बनाया ।
Ram drew a beautiful picture with the pen.

(vii) सैनिक देश की रक्षा के लिए प्राणों को त्याग देते हैं ।
Soldiers sacrifice their lives to protect the country.

## खण्डः 'ग'

## अनुप्रयुक्त-व्याकरणम्

*15 अङ्काः*

## अनुप्रयुक्त व्याकरण

## Applied Grammar

**4.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलं प्रश्नत्रयम्)
निम्नलिखित वाक्यों में रेखांकित पदों की सन्धि अथवा सन्धि-विच्छेद करके लिखिए । (केवल तीन प्रश्न)
Write the sandhi form or disjoin the sandhi of the underlined words in the following sentences. (Only three questions) *3×1=3*

(क) जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धोपदेशम् ।

(ख) विश्वेऽपि योगदिवस: सोत्साहम् मान्यते ।

(ग) अविवेक: परमापदाम् + पदम् ।

(घ) किमुक्तै: + एभि: अधुना तां पताकां हरामि व: ।

**5.** रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
रेखांकित पदों के प्रकृति और प्रत्यय को जोड़कर अथवा विभक्त कर उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Select the appropriate answer by joining or disjoining the base element and the suffix element in the underlined words. (Only three questions) *3×1=3*

(i) किं वस्तु गुरवे प्रदेयम् त्वया ।

(A) प्र + दा + यत्

(B) प्र + यच्छ + तव्यत्

(C) प्र + दा + अनीयर्

(D) प्र + दा + शतृ

(ii) धनविषये सञ्चयो न कृ + तव्यत् ।

(A) करणीयम्

(B) कर्तव्य:

(C) कर्तव्या

(D) कर्तव्यता

(iii) अस्माकं कृते योगशिक्षा अतीव उपयोगिन् + ङीप् अस्ति ।

(A) उपयोगी

(B) उपयोगिनी

(C) उपयोग्या

(D) उपयोगिन:

(iv) गर्भेश्वरत्वम् अभिनव-यौवनत्वम् ।

(A) यौवन + तल्

(B) युवन् + त्वम्

(C) यौवन + त्व

(D) यौवन + त्वम्

**6.** मञ्जूषायां प्रदत्तै: समुचितै: अव्ययपदै: रिक्तस्थानानि पूरयित्वा लिखत । (केवलं प्रश्नत्रयम्)
मञ्जूषा में दिए गए समुचित अव्यय पदों से रिक्त स्थान भरकर वाक्य लिखिए । (केवल तीन प्रश्न)
Write the sentence after filling in the blanks with appropriate indeclinable words given in the box. (Only three questions) *3×1=3*

(क) प्राज्ञ: _________ कुमार: ।

(ख) _________ विदधीत न क्रियाम् ।

(ग) तत् श्रुत्वा राजा ________ आसीत् ।

(घ) बलराम ! किम् _________ कक्षायां कोऽपि विशिष्ट: कार्यक्रम: ?

**मञ्जूषा**

| |
|---|
| अद्य, तूष्णीम्, सहसा, खलु । |

**7.** कोष्ठक-प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत । (केवलं प्रश्नत्रयम्)

कोष्ठक में दिए गए शब्दों में उचित विभक्ति का प्रयोग कर रिक्त स्थान पूर्ण कीजिए । (केवल तीन प्रश्न)

Fill in the blanks after applying the appropriate case-endings in the words given in the brackets. (Only three questions) *3×1=3*

(क) वित्तं _________ विना सफलं न भवति । (दानभोग)

(ख) गृहे मातुः _________ योगशिक्षायाः विषये श्रुतवती । (मुख)

(ग) न रूपमालोकयते न _________ अनुवर्तते । (कुलक्रम)

(घ) एतेषां रत्नानां मध्ये यत् _________ रोचते तद् गृहाण । (युष्मद्)

**8.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समासं वा चित्वा लिखत । (केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पदों के समुचित विग्रह अथवा समास चुनकर लिखिए । (केवल तीन प्रश्न)

Write the vigraha (the descriptive sentence) or the compound of the underlined words of the following sentences. (Only three questions) *3×1=3*

(i) दीर्घा ग्रीवा यस्य सः भवति खुरास्तस्य चत्वार एव ।

(A) दीर्घग्रीवा

(B) दीर्घग्रीवः

(C) दीर्घग्रीवया

(D) दीर्घाग्रीवा

(ii) प्रयाणाभिमुखाय तस्मै सविस्मयाः <u>कोषगृहे</u> नियुक्ताः ।

(A) कोषे गृहे

(B) कोषात् गृहे

(C) कोषस्य गृहे

(D) कोषं गृहम्

(iii) सुखदुःखसमे कृत्वा <u>लाभालाभौ</u> जयाजयौ ।

(A) लाभः च अलाभः च

(B) लाभः च अलाभं च

(C) लाभेन अलाभेन

(D) लाभाः अलाभाः

(iv) सर्वापि <u>यज्ञाय सामग्री</u> समहृता ।

(A) यज्ञसामग्रम्

(B) यज्ञसामग्री

(C) यज्ञसामग्रेः

(D) सामग्रीयज्ञः

## खण्डः 'घ'

## (i) पठितावबोधनम्

**25 अङ्काः**

## पठित-अवबोधन

## Reading Comprehension

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the following questions in Sanskrit. *5*

तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायंसमयप्रयुक्तः स्वभाववृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः । झञ्झावातोद्धूतैः रेणुभिः शीर्णपत्रैः कुसुमपरागैः शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्तः । इह पर्वतश्रेणीतः पर्वतश्रेणीः, वनाद् वनानि न कोऽपि सरलो मार्गः, नानुद्भेदिनी भूमिः, पन्थाः अपि च नावलोक्यते । क्षणे-क्षणे हयस्य खुराः चिक्कण-पाषाण-खण्डेषु प्रस्खलन्ति । पदे-पदे दोधूयमानाः वृक्षशाखाः सम्मुखमाघ्नन्ति, परं दृढसङ्कल्पोऽयं सादी न स्वकार्याद् विरमति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) अकस्मात् कः उत्थितः ?

(ii) कोऽपि मार्गः कीदृशः नास्ति ?

(iii) सादी कीदृशः अस्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) झञ्झावातः कथं द्वैगुण्यं प्राप्तः ?

(ii) हयस्य खुराः कुत्र प्रस्खलन्ति ?

(iii) कः स्वकार्याद् न विरमति ?

(इ) निर्देशानुसारम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'सादी' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'वृक्षशाखा:' इति पदस्य विशेषणपदं किम् ?

(iii) 'प्रकाश:' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following poetry and answer the questions based on them in Sanskrit. *5*

पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्
दीर्घग्रीव: स भवति खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि याम: ।।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) अश्व: किम् अत्ति ?

(ii) दीर्घग्रीव: क: ?

(iii) अश्व: अजस्रं कं धूनोति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) अश्व: कान् प्रकिरति ?

(ii) अश्व: पुच्छं कीदृशं वहति ?

(iii) अश्वस्य खुरा: कति भवन्ति ?

(इ) निर्देशानुसारम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) $2\times1=2$

(i) 'वहति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'समीपम्' इत्यस्य पदस्य विलोमपदं किमत्र प्रयुक्तम् ?

(iii) 'शकृत्पिण्डकान्' इति विशेष्यपदस्य विशेषणपदं किम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following part of a drama and answer the questions based on them in Sanskrit. 5

*अरुन्धतीजनकौ* : महत्कौतुकं वत्सस्य ।

*कौसल्या* : अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च ।
भगवति ! जानामि तं पश्यन्ती वञ्चितेव ।
तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् पलायमानं दीर्घायुषम् ।

*अरुन्धती* : अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते ?

*वटवः* : पश्यतु कुमारस्तावदाश्चर्यम् ।

*लवः* : दृष्टमवगतं च नूनमाश्वमेधिकोऽयमश्वः ।

*वटवः* : कथं ज्ञायते ?

*लवः* : ननु मूर्खाः । पठितमेव युष्माभिरपि तत्काण्डम् । किं न पश्यथ ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः । यदि च विप्रत्ययस्तत्पृच्छत ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) कुमारः किं पश्यतु ?

(ii) अतिजवेन कः दूरमतिक्रान्तः ?

(iii) महत्कौतुकम् कस्य ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) रक्षितार: कीदृशा: सन्ति ?

(ii) अश्व: कीदृश: अस्ति ?

(iii) अरुन्धती पलायमानं लवं दृष्ट्वा किं कथयति ?

(इ) निर्देशानुसारम् उत्तरत । (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'पश्यतु' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'दण्डिन:' इति पदस्य विशेष्यपदं किम् ?

(iii) 'निश्चयेन' इति अर्थे किमव्ययपदम् अत्र प्रयुक्तम् ?

**12.** अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं प्रश्नचतुष्टयम्) ।
निम्नलिखित वाक्यों में रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए । (केवल चार प्रश्न)
Form questions on the basis of underlined words in the following sentences. (Only four questions) *4×1=4*

(क) <u>चन्द्रापीडं</u> विनीततरमिच्छन् कर्तुं शुकनास: उवाच ।

(ख) <u>श्रेष्ठ:</u> यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।

(ग) जनो <u>भयात्</u> राजवचनमनुगच्छति ।

(घ) समुद्र: <u>राज्ञे</u> व्ययार्थं रत्नचतुष्टयं दास्यति ।

(ङ) अस्माकं कृते <u>योगशिक्षा</u> अतीव उपयोगिनी अस्ति ।

**13.** अधोलिखितस्य श्लोकस्य अन्वयं लिखत ।
निम्नलिखित श्लोक का अन्वय लिखिए ।
Write the prose order of the following verse. *3*

अन्धन्तम: प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रता: ।।

**14.** अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत ।
निम्नलिखित श्लोक का भावार्थ संस्कृत भाषा में लिखिए ।
Write the explanation of the following verse in Sanskrit. *3*

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृध: कस्यस्विद्धनम् ।।

**अथवा (OR)**

'दीनबन्धु: श्रीनायार:' इति पाठमाधृत्य
श्रीनायारस्य चरित्रचित्रणं सङ्क्षेपेण संस्कृतभाषया लिखत ।

**खण्डः 'घ'**

**(ii) संस्कृत-साहित्येतिहासस्य सामान्य: परिचय:** *10 अङ्काः*

**संस्कृत-साहित्य और इतिहास का सामान्य परिचय**

**General Introduction of Sanskrit-Literature and History**

**15.** अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर दिए गए विकल्पों में से चुनकर लिखिए । (केवल तीन प्रश्न)
Choose the answer from the given options of the following questions. (Only three questions) *3×1=3*

(i) बाणभट्टस्य आख्यायिका गद्यरचना का ?

(A) शिवराजविजयम् (B) हर्षचरितम्

(C) उत्तररामचरितम् (D) वासवदत्ता

(ii) 'शिशुपालवधम्' इति महाकाव्यस्य रचयिता क: ?

(A) माघ: (B) बिल्हण:

(C) भर्तृहरि: (D) भरत:

(iii) वेदव्यास: कं काव्यं रचितवान् ?

(A) रामायणम् (B) कुमारसम्भवम्

(C) उत्तररामचरितम् (D) महाभारतम्

(iv) 'रावणवधम्' इति काव्यस्य अपरं नाम किम् ?

(A) भीमकाव्यम् (B) भट्टिकाव्यम्

(C) जानकीहरणम् (D) वेणीसंहारम्

**16.** प्रश्नानाम् उत्तराणि प्रदत्त-विकल्पेभ्य: चित्वा लिखत । (केवलं प्रश्नत्रयम्)
प्रश्नों के उत्तर दिए गए विकल्पों में से चुनिए । (केवल तीन प्रश्न)
Choose the answer from the given options. (Only three questions) *3×1=3*

(i) दशकुमारचरितस्य रचयिता क: ?

(A) दण्डी (B) सुबन्धु:

(C) बाणभट्ट: (D) भास:

(ii) 'भारतचम्पू:' इति काव्ये कस्य कथाया: वर्णनमस्ति ?

(A) भारतस्य (B) रामायणस्य

(C) भरतस्य (D) महाभारतस्य

(iii) प्रसिद्धम् आधुनिकं गद्यकाव्यं किम् वर्तते ?

(A) शिवराजविजयम् (B) कादम्बरी

(C) वासवदत्ता (D) हर्षचरितम्

(iv) नलचम्पूकाव्ये कस्य प्रणयकथा वर्णिता वर्तते ?

(A) अज-इन्दुमत्यो: (B) नल-दमयन्त्यो:

(C) मालविका-अग्निमित्रयो: (D) दुष्यन्त-शकुन्तलयो:

**17.** प्रदत्तविकल्पेभ्य: समुचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)
Choose appropriate answer from the given options. (Only four questions)

*4×1=4*

(i) 'महावीरचरितम्' इति नाटकस्य रचयिता क: ?

(A) भवभूति: (B) भास:

(C) शूद्रक: (D) विशाखदत्त:

(ii) 'बालकौतुकम्' इति पाठ: कस्मात् ग्रन्थात् गृहीत: ?

(A) उत्तररामचरितात् (B) कादम्बर्या:

(C) स्वप्नवासवदताया: (D) दशकुमारचरितात्

(iii) 'मुद्राराक्षसम्' इत्यस्य काव्यस्य रचयिता क: ?

(A) शूद्रक: (B) विशाखदत्त:

(C) बाणभट्ट: (D) अश्वघोष:

(iv) 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य नायक: क: ?

(A) चारुदत्त: (B) अग्निमित्र:

(C) दुष्यन्त: (D) नल:

(v) एतेषु रूपकेषु कं भास: रचितवान् ?

(A) मृच्छकटिकम् (B) प्रतिमानाटकम्

(C) अभिज्ञानशाकुन्तलम् (D) उत्तररामचरितम्

## खण्डः 'ङ'

## छन्दोऽलङ्कारपरिचयः — 10 अङ्काः

## छन्द और अलंकार परिचय

## Introduction to Metres and Figures of Speech

**18.** (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्) *5*

निम्नलिखित प्रश्नों के उत्तर दीजिए । (केवल तीन प्रश्न)

Answer the following questions. (Only three questions) *3×1=3*

(i) शिखरिणी छन्दसि प्रतिचरणं कति वर्णाः विद्यन्ते ?

(ii) 'तभजाजगौगः' इति कस्य छन्दसः लक्षणम् अस्ति ?

(iii) अनुष्टुप् छन्दसः एकम् उदाहरणं लिखत ।

(iv) भगणस्य सङ्क्षिप्त-चिह्नानि कानि सन्ति ?

(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तं छन्दः परिचीय तस्य नाम लिखत । (केवलं प्रश्नद्वयम्)

निम्नलिखित श्लोक पंक्तियों में प्रयुक्त छन्द चुनकर नाम लिखिए । (केवल दो प्रश्न)

Write the name of the metre in the following lines of verses. (Only two questions) *2×1=2*

(i) पश्चादुपुच्छं वहति विपुलं तच्च धूनोत्यजसुम् ।

(ii) सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।

(iii) ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ।।

**19.** (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्) *5*

निम्नलिखित प्रश्नों के उत्तर दीजिए । (केवल तीन प्रश्न)

Answer the following questions. (Only three questions) *3×1=3*

(i) यमकालङ्कारस्य लक्षणं लिखत ।

(ii) 'साधर्म्यम् भेदे' इति कस्य अलङ्कारस्य लक्षणम् ।

(iii) उत्प्रेक्षा-अलङ्कारस्य एकम् उदाहरणं लिखत ।

(iv) 'श्लेष' अलङ्कारस्य लक्षणं किम् ?

(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत । (केवलं प्रश्नद्वयम्)

निम्नलिखित श्लोकपंक्तियों में प्रयुक्त अलंकार का नाम लिखिए । (केवल दो प्रश्न)

Write the figure of speech in the following lines of verses. (Only two questions) *2×1=2*

(i) जात ! पश्यामि ते मुखपुण्डरीकम् ।

(ii) रमते न मरालस्य मानसं मानसं विना ।

(iii) श्याम-श्यामैर्गुच्छ-गुच्छैः कुञ्चित-कुञ्चितैः ।